* H E - 0 0 1 - 0 0 1 5 3 3 *

# HE-001-001533

Seat No. ________

## B. A. (Sem. V) (CBCS) Examination

**May / June – 2017**

## Sanskrit : Paper-XV

*(Sanskrit Bhasha Ane Sahitya)*

**Faculty Code : 001**
**Subject Code : 001533**

Time : $2\frac{1}{2}$ Hours] [Total Marks : **70**

१ નીચેનો પરિચ્છેદવાંચી તેની નીચે આપેલા પ્રશ્નોના ઉત્તર સંસ્કૃતમાં લખો : **१४**

1 Read the following passage and write answers in Sanskrit to the question given below it : **14**

कश्चित् राजकुमार एकदा मृगयायै गन्तुम् ऐच्छत् । घोरवनं प्रविशन्तं तं मन्त्रिपुत्रो न्यवारयत् किन्तु सः कुमार तम् अवागणयत् । वने मृगयां कृत्वा श्रान्तः सः कञ्चन तरुम् आसाद्य तस्य छायायां मुहूर्तम् उपाविशत् । अत्रान्तरे कञ्चित् व्याघ्रम अवालोकयत् सः । भीतो राजकुमारः तूर्णं तं पादपम् आरोहत् । परन्तु तत्र पूर्वम् एवारूढं कञ्चित् भल्लूकं विलोक्य स पुनरपि भृशं भीतः अभवत् । भल्लूकः अभाषत् ''अलं भयेन । अयं वृक्षो ममाश्रयः त्वं ममावासं प्राप्तः असि । त्वं ममातिथिः अतो न कदापि त्वां वञ्चयामि'' इति । एतैः शब्दैः भल्लूको राजपुत्रस्य चित्ते विश्वासम् उत्पादयति स्म । अत्रान्तरे सूर्यः अस्तं गच्छति स्म । श्रान्तं राजपुत्रं भल्लूकः अङ्कम् आरोप्य निद्रापयति स्म ।

(१) राजकुमार किमर्थं वनं गन्तुम् ऐच्छत् ?

(२) राजकुमारं कः न्यवारयत् ?

(३) श्रान्तः राजकुमार कुत्र मुहूर्तम् उपाविशत् ?

(४) भीतः राजकुमारः कम् आरोहत् ?

(५) राजकुमारः कं विलोक्य पुनरपि भृशं भीतः अभवत् ?

(६) भल्लूकः राजकुमारं किम् अभाषत् ?

(७) श्रान्तं राजपुत्रं भल्लूकः किं करोति स्म ?

૨ નીચે આપેલ પત્રવિષયને અનુલક્ષીને સંસ્કૃતમાં પત્રલેખન કરો : (કોઈપણ **એક**) ૧૪

**2** Write a letter in Sanskrit an any **one** of the following subject : **14**

(૧) छात्रालयस्था भार्गवी महाविद्यालयस्य वक्तृत्वस्पर्धायां प्रथमक्रमाङ्क प्राप्तवति तद् विज्ञापयितुं स्वपितरम् एकं पत्रं लिखति ।

(૨) भावनगरे निवसन् राजेशः स्नातकपरीक्षायां सुवर्णचन्द्रकम् अलभत तन्निमित्ते आयोजिते कार्यक्रमे स्व अध्यापकाय निमन्त्रणं दातुम् एकं पत्रं लिखति ।

૩ નીચેનામાંથી કોઈપણ **એક** પર સંસ્કૃતમાં નિબંધ લખો : ૧૪

**3** Write an essay in Sanskrit on any **one** of the following : **14**

(૧) विद्याधनं सर्वधनप्रधानम् ।

(૨) जननी जन्मभूमिश्च स्वर्गादपि गरीयसि ।

(૩) परोपकारः ।

(૪) गीता सुगीता कर्तव्या ।

૪ (અ) નીચેનામાંથી કોઈપણ **એક** ગદ્યખંડનો અનુવાદ કરો : ૮

**4** (A) Translate any **one** of the following passages : **8**

(૧) भवादृशा एव भवन्ति भाजनान्युपदेशानाम् । अपगतमले हि मनसि स्फटिकमणाविव रजनिकरगभस्तयो विशन्ति सुखमुपदेशगुणाः । गुरुवचनममलमपि सलिलमिव महदुपजनयति श्रवणस्थितं शूलमभव्यस्य । इतरस्य तु करिण इव शङ्खाभरणमाननशोभासमुदयमधिकतरमुपजनयति । हरति च सकलमतिमलिनमप्यन्धकारमिवदोषजातं प्रदोषसमयनिशाकर इव गुरूपदेशः ।

(૨) न परिचयं रक्षति, नाभिजनमीक्षते, न रूपमालोकयते, न कुलक्रममनुवर्तते, न शीलं पश्यति, न वैदग्ध्यं गणयति, न श्रुतमाकर्णयति, न धर्ममनुरुध्यते, न त्यागमाद्रियते, न विशेषज्ञतां विचारयति, नाचारं पालयति, न सत्यमनुबुध्यते, न लक्षणं प्रमाणीकरोति । गन्धर्वनगरलेखेव पश्यत एव नश्यति । अद्याप्यारूढमन्दरपरिवर्तभ्रान्तिजनितसंस्कारेव परिभ्रमति ।

(બ) નીચેનામાંથી કોઈપણ **બે** સંદર્ભ સાથે સમજાવો : ૬

(B) Explain any **two** with reference to the context : **6**

(१) अपरिणामोपशमो दारुणो लक्ष्मीमदः ।

(२) चन्दनप्रभवो न दहति किमनलः ?

(३) अकालकुसुमप्रसवा इव मनोहराकृतयोपि लोकविनाशहेतवः ।

(४) आरूढप्रतापो हि राजा त्रैलोक्यदर्शीव सिद्धादेशो भवति ।

**૫** નીચેનામાંથી કોઈપણ **બે** વિષય પર ટૂંકનોંધ લખો : **૧૪**

**5** Write a short notes on any **two** of the following : **14**

(१) बाणभट्टस्य जीवनं, कृत्तयश्च ।

(२) यौवनप्रभावः ।

(३) गुरोपदेशस्य महत्त्वम् ।

(४) लक्ष्म्याः स्वभावः ।

---